विधि। देवान् यज्ञैरृषीन् वेदैरर्च्चयित्वा प्रयत्नतः। अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम्। सोऽनुपूर्व्व्याश्रमान् राजन्! गत्वा सिद्धिमवाप्नुयात्। राजर्षित्वेन राजेन्द्र! भैक्षचर्य्याध्वसेवया। अपेतगृहधर्म्मोऽपि चरेज्जीवितकाम्यया। न चैतन्नैष्ठिकं कर्म्म त्रयाणां भूरिदक्षिणम्। चतुर्णां राजशार्दूल! प्राहुराश्रमवासिनाम्। बाह्वायत्तं क्षात्त्रियैर्मानवानां लोकश्रेष्ठं धर्म्ममासेवमानैः। सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां राज्ञो धर्म्मा इति वेदाच्छृणोमि। एवं धर्म्मान् राजधर्म्मेषु सर्व्वान् सर्व्वावस्थं संप्रलीनान्निबोध। अल्पश्रमानल्पफलान् वदन्ति धर्म्मानन्यान् वेदविदो मनुष्याः। महाश्रमं बहुकल्याणरूपं क्षात्त्रं धर्म्मं नेतरं प्राहुरार्य्याः। सर्व्वे धर्म्माः राजधर्म्मप्रधानाः सर्व्वे धर्म्माः पाल्यमानाश्चरन्ति। सर्व्वत्यागो राजधर्म्मेषु राजंस्त्यागं धर्म्मञ्चाहुरग्र्यं पुराणम्। मज्जेत्त्रयी दण्डनीतौ हतायां, सर्व्वे धर्म्माः प्रक्षयेयुर्व्विरुद्धाः। सर्व्वे धर्म्माश्चाश्रमाणां हताः स्युः क्षात्त्रे त्यक्ते राजधर्म्मे पुराणे। सर्व्वे त्यागा राजधर्म्मेषु चोक्ताः सर्व्वा विद्या राजधर्म्मेषु युक्ताः। सर्व्वे लोका राजधर्म्मे प्रविष्टाः यथा जीवाः प्राकृतैर्बध्यमानाः। धर्म्मश्रुतानामुपपीडनाय एवं धर्म्मा राजधर्म्मैर्व्वियुक्ताः। चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव!। लोकवेदोत्तराश्चैव क्षात्त्रे धर्म्मे समाहिताः। सर्व्वाण्येतानि धर्म्माणि क्षात्त्रे राजन्यसत्तम!। अप्रत्यक्षं बहुद्वारं धर्म्ममाश्रमवासिनाम्। क्षात्त्रेणैव हि धर्म्मेण प्रत्यक्षं क्रियते नृप!। द्विजार्च्चनं वह्निप्राणां तथा नारायणार्च्चनम्। राज्यानां पालनञ्चैव रणे निर्भयता तथा। नित्यं दानं ब्राह्मणेभ्यः शरणागतरक्षणम्। पुत्त्रतुल्यं प्रजानाञ्च दुःखिनां परिपालनम्। शस्त्रास्त्राणाञ्च नैपुण्यं रणे शौर्य्यं तथैव च। तपश्च धर्मकृत्यञ्च यत्नतः कुरुते सदा। पण्डितं नीतिशास्त्रञ्च नित्यञ्च परिपालयेत्। सभामध्ये वाग्मवेच्च नित्यं सद्भिश्च संयुतः। हस्त्यश्वरथपादातं सेनाङ्गञ्च चतुष्टयम्। पालयेत् यत्नतो नित्यं यशस्वी च प्रतापवान्। रणेऽरिमन्त्रितश्चैव दानेनाभिमुखो भवेत्। रणे यो वा त्यजेत् प्राणान् तस्य स्वर्गो यशस्करः"। विस्तरस्तु भा० शा० राजधर्म्मे

**क्षत्त्रधर्म्मन्** पु० नहुषभ्रातुरनेनसो वंश्ये संक्रतेः पुत्त्रे १नृपभेदे। "संक्रतेरपि धर्म्मात्मा क्षत्त्रधर्म्मा महायशाः। अनेनसः समाख्याताः क्षत्त्रवृद्धस्य मे शृणु" हरिवं० २९ अ०

क्षत्त्रस्य। धर्म्मः। २क्षत्त्रियस्य धर्म्मे युद्धादौ। क्षत्त्रं तत्सम्बन्धी धर्म्मो यस्य कनिच् समा०। ३क्षत्त्रियधर्म्मयुते। "शास्त्रेणाभिमुखो यस्तु बध्यते क्षत्रधर्म्मणा" मनुः

**क्षत्त्रधृति** पु० क्रतुभेदे "क्षत्त्रधृतिः" "तदुभयत एके त्रिष्टोमज्योतिष्टोमौ।" कात्या० श्रौ० १५।९।२४।२५। "ततो मासान्ते श्रावण्याम् क्षत्त्रधृतिसंज्ञः क्रतुर्भवति। कुर्व्वन्ति एके उपरिष्टात्। अत्र च वैशाख्याममावास्यायां पशुबन्धौ, ज्यैष्ठमासपौर्णमास्यां केशवपनीयः, आषाढ्यां व्युष्टिद्विरात्रः, श्रावण्यां क्षत्त्रधृतिः" भाद्रपदाश्वयुजयोस्त्रिष्टोमज्योतिष्टोमौ, कार्त्तिक्यां सौत्रामणीति" कर्कः।

**क्षत्त्रबन्धु** पु० क्षत्त्रं राष्ट्रं बन्धुरिवास्य। १क्षत्त्रिये "ब्राह्मणं कुशलं पृच्छेत् क्षत्त्रबन्धुमनामयम्"। "आ द्वाविंशात् क्षत्त्रबन्धोरा चतुर्विंशतेर्विशः" मनुः। क्षत्त्रस्य बन्धुरिव। २क्षत्त्रियतुल्ये अपकृष्टक्षत्त्रिये। "क्षत्त्रबन्धुः सचानार्य्यो रामः परमदुर्म्मतिः" रामा० ल० २३अ०

**क्षत्त्रभृत्** पु० क्षत्त्रं बिभर्त्ति भृ-क्विप्। क्षत्त्रियभरणकर्त्तरि अग्निभेदे। "अग्निर्ब्राह्मणवानग्निः क्षत्त्रभृत्" आश्व० श्रौ० ४।१।२२। "विराडग्ने क्षत्त्रभृदा दिदीहि" यजु० २७।७। क्षत्त्रं भर्त्तव्यत्वेनास्त्यस्य मतुप् मस्य वः। क्षत्त्रवत् तत्रैव।

**क्षत्त्रवनि** पु० क्षत्त्रं वनति "छन्दसि वनसनरक्षिमथाम्" पा० कर्म्मण्युपपदे इन्। १क्षत्त्रजातिभागिनि। "ब्रह्मवनि त्वा क्षत्त्रवनि रायस्पोषवनि" यजु० २७। सुपां सुलुगिति" पा० सर्व्वत्र अमो लुक्। क्वचित् कर्म्मणि वाच्येऽपि इनि। २क्षत्त्रस्यैव "ध्रुवमसि पृथिवीं दृंह ब्रह्मवनि त्वा क्षत्त्रवनिः" यजु० १।१७। "क्षत्त्रेण वन्यते पुरोडाशनिष्पत्त्यर्थं क्षत्त्रवनि" वेददी०

**क्षत्त्रविद्या** स्त्री ६त०। धनुर्वेदे। तस्य व्याख्यानः ऋगयना० अण्। क्षात्त्रविद्य १तद्व्याख्याने ग्रन्थे तां वेत्ति अधीते वा अण्। "विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्" वार्त्ति० विद्यान्तत्वेन ठञ् प्राप्ते "अङ्गक्षत्त्रधर्म्मत्रिपूर्व्वविद्यान्ताच्चेति" वार्त्ति० ठञो निषेधात् न ठञ्। क्षात्त्रवेद्य तद्विद्याध्येतरि तद्वेत्तरि च त्रि०।

**क्षत्त्रवृक्ष** पु० क्षत्त्रः क्षत्त्रविशेषनामा वृक्षः। मुचकुन्दाख्ये वृक्षे राजनि० तस्य मुचकुन्दक्षत्त्रनामकत्वात्तथात्वम्।

**क्षत्त्रवृद्ध** पु० आयुर्वंश्ये वृद्धशर्म्मनामान्तरके नृपभेदे "क्षत्त्रधर्म्मन्" शब्दे दृश्यम्। "अनेनसः समाख्याता क्षत्त्रवृद्धस्य मे शृणु।